International Journal of Sanskrit Research 2021; 7(4): 161-162

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 161-162
© 2021 IJSR
www.anantaajournal.com
Received: 07-05-2021
Accepted: 09-06-2021

**Dr. Manasi Rath**
Lecture in Dharma Shastra,
Bagdevi Sanskrit College, Daliji,
Kendrapara, Odisha, India

**Corresponding Author:**
**Dr. Manasi Rath**
Lecture in Dharma Shastra,
Bagdevi Sanskrit College, Daliji,
Kendrapara, Odisha, India

# स्मृतिसारसंग्रहस्य वैशिष्ट्यं

**Dr. Manasi Rath**

अनेकासां स्मृतीनां सारसंग्रहरूपोयं ग्रन्थ उत्कलीयव्रतोत्सवानां विधानेन सह गर्भाधानादिविवाहान्तसंस्काराणां विचारप्रतिपादको वर्त्तते । सप्तदशशतके विरचितस्य तालपत्रमातृकारूपेण च जीर्णशीर्णरूपेण विधमानस्य ग्रन्थरत्नस्यास्य प्रकाशनेन नन्दमहोदय: सुधीसमाजस्य न केवलं श्रद्धाभाजनं भवति, अपितु उत्कलीयधर्मशास्त्रभाण्डागारमपि पुष्कली करोति। ग्रन्थोयं धर्मशास्त्रछात्राणामध्यापकानां गवेषकाणाश्च महते कल्याणाय कल्पयिष्यत इति द्रढीयान् मे विश्वास: । श्रीमता विश्वनाथमिश्रेण स्मृतिसारसंग्रहे स्वग्रन्थे प्रथमाष्टमीप्रकरणे तत्र उत्कलेषु इत्यादिवाक्ये उत्कलशब्दस्य प्रयोगादयं उत्कलीय इति निश्चप्रचं वक्तुं शक्यते ।

श्रीमता भगवता विश्वनाथमिश्रेण स्मृतिसारसंग्रह: नामधेय: केवलमेकैव ग्रन्थो विरचित:। यद्यपि ग्रन्थोयों अनेकासां स्मृतिनां साररूपेणोद्धृत: । तथापि न कस्या अपि स्मृते: पंवक्ति सहोद्धरणमनेन कृतम् ।

मन्वादिपुरातनस्मृतिं विहाय अर्वाचीनै: नैतादृश: स्मृतिग्रन्थ: विरचितो दृश्यते यथा विश्वनाथमिश्रेण विरचित: । समुदायग्रन्थ: सार्द्धद्विशतोत्तरसहस्रव्दयात्मकै: ल्शोक: निबध्द्रोस्ति ।

सर्वे ल्शोका:अनुष्टुप्छन्दसा प्रायश: सन्ति: । एकोपि ल्शोक: नानुवादात्मको भवति, नापि कस्य स्मृतिकारस्यानुकरणमनेन कृतम् ।

ल्शोकमाध्यमेन सर्वेपि धर्मशास्त्रविषया अनेन प्रतिपादिता: । ग्रन्थेस्मिन् तत्पूर्ववर्त्तिनाम् अनेकेषां स्मृतिपुराणानां निबन्धकाराणाश्च नामानि उध्दृतानि । स्वमतमपि अन्ते व्यवस्थापितम् ।

स्मृतिकारेषु मुख्यत: मन्वत्रि-याज्ञवल्कय-दक्ष-व्यास-वसिष्ठ-बृहद्वशिष्ठ-बृहत्शातातप-प्रचेता-प्रजापति-बौधायन-मरीचि-उशाना-कात्यायन-कण्व-गौतम-जातुकर्ण-जाबालि-देवल-नारद-जमदग्नि-आपस्तम्ब-अङ्गिरा-पितामह-यम-हारीत-लोगाक्षि-विश्वामित्र-शङ्ख-संवत्त-सुमन्तुप्रभृतीनां नामानि उट्टङ्कितानि ।

पुराणेषुआग्रेयपुराण-नारदीयपुराण-पद्मपुराण-ब्रह्मपुराण-श्रीमद्भागवतपुराण-मत्स्यपुराण-महाभारत-भगवद् गीता-मार्कण्डेयपुराण-लिङ्गपुराण-वराहपुराण-गविष्णुधर्मोत्तरपुराण-स्कन्दपुराणादीनामुद्धरणमपि अनेन कृतम् । निबन्धकारेषु कालादर्शकार-कृत्यकौमुदीकार-जीमुतवाहन-दिवाकर-माधवाचार्य-विज्ञानेश्वर-विधाकर-विश्वरूपशतानन्द-सत्यव्रतभृतीनां नामान्यपि समुद्धृतान्यनेन ।

गदाधरराजगुरो: पूर्वं ग्रन्थस्यास्य स्मृतिसारसंग्रहस्य ख्यातिउत्केलेषु महत्यासीत् । एकमपि ग्रन्थं विरच्य उत्कलस्य धर्मशास्त्रजगति बहव: निबन्धग्रन्था आसन् तथापि तत्र विश्वनाथमिश्रस्य स्मृतिसारसंग्रह अतीव जनप्रिय आसीत् । यतो ह उत्कलस्य सर्वेषु प्रान्तेषु ग्रन्थस्यास्य प्रतिलिपय: उपलब्धा: भवन्ति । पुनश्च धर्मशास्त्रस्य सर्वोनेव अवान्तरविषयान् विचार्य तद्विषये निर्णयं दत्तवान् ।

यधपि अनेके निबन्धग्रन्था: धर्मशास्त्रजगति वर्त्तन्ते । तथापि ग्रन्खस्यास्य वैशिष्टश्चं महत्त्वश्च किमपि अपरूपं प्रतिभाति । अस्य रचनाशैली यधपि नापुर्वा तथापिविषयसन्निवेशप्रसङ्गे काप्यपुर्वता दृश्यते । ग्रन्थकारोयं उत्कलीय इति कृत्वा उत्कलीव्रतोत्सवेषु प्रथमाष्टमीं प्रति प्राथम्यमनेन प्रदत्तम् । य: उत्सव: उत्कलं विहाय नान्यत्र परिपाल्यते । तत: पूर्वमुत्कले ये निबन्धार आसन् तै: प्रथमाष्टमीपालनविधिविषये किमप्युक्तम् । परन्तु अस्यानन्तरं ये अन्ये निबन्धार: धर्मशास्त्रविषये उद् भुता:तै: सर्वै:अस्य मतं समर्थितं संगृहीतश्च ।

अस्मिन् ग्रन्थे उत्कले प्रचलितानां व्रतानां उत्सवानश्च तिथिविशेषेषु निर्णयं विधाय तैत्रादारभ्य फाल्गुनान्तानां मासानां कृत्यानि संविचार्य श्राद्धाशौचादिविषये सम्यक् आलोच्य अन्ते गर्भाधानादारभ्य विवाहान्तानां संस्काराणां कालविध्यादय: विचारिता: ।

-व्यवहारिके जीवने स्मृतिसारसंग्रहस्योपादेयत्वम् :

व्यवहारिके जीवने धर्मशास्त्रस्योपादेयत्वमुपजीवित्वश्च वर्त्तत एव । उत्कलेषु प्रचलतां व्रतोत्सवानां मध्ये मुख्यत: प्रथमाष्टमी,प्रावरणाष्टमी,माघसप्तमी,अशोकाष्टमी, पवित्रारोपणम्,यमद्वितीया,पौषाभिषेकादीनां विषयाणां कर्मकाल: निर्णय: तत्र विहित: । अतीत: तदनुसारेण उत्कलीयानां धर्मशास्त्रीयानुष्ठाने सौकर्यमनुभूतम् । गर्भाधानादारभ्य विवाहं यावत् समेषां संस्काराणां कालविध्यादि प्रतिपादकत्वेन श्राद्धाशौचादीनाश्च विषये उत्कलीयदेशाचारष्ट्या सम्यक् निर्णितत्वाच्च उत्कलेषु धर्मपरम्परायां लौकिकव्यवहारेष्वपि ग्रन्थस्यास्य महती प्रयोजनीयता वर्त्तते । अत: श्रीविश्वनाथप्रणीत: स्मृतिसारसंग्रहाभिधोयं ग्रन्थ: उत्कलीयानां व्रतोत्सवाधनुष्ठानेषु सुमहदुपकारक इत्यत्र नास्ति कश्चन सन्देहस्य लेशावसर इति ।

**Reference**

1. Dr. Atul Kumar Nanda (Book-"Smriti Sara Samgrahah"), Dr. Dayanidhi Mishra (Book-"Utkaliya Sudhi Samiksha"), Dr. Biswanath Swain (Book-"Praci Sudha").